# तव विरहे...... ।

## कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

1. गीतगोविन्दस्य कर्ता कः?

( जयदेवः, वेदव्यासः, कालिदासः) उ. जयदेवः

2. गीतगोविन्दे कति सर्गाः सन्ति ?

( द्वादश, दश, पञ्चदश) उ. द्वादश

3. जयदेवः कस्मिन् देशे जनिमलभत ?

( मङ्गलदेशे, वङ्गदेशे, केरलदेशे) उ. वङ्गदेशे

4. सा भारं मनुते । किम् ?

( हारं, पुष्पं, शिलां) उ. हारं

5. मलयजपङ्कं विषमिव पश्यति । का ?

( राधा, सखी, शारिका) उ. राधा

6. विरहविहितमरणा का ?

( हरिणी, राधा, प्रियसखी) उ. राधा

7. का गणे नान्तर्भवति ?

( शारिका, केशवः, कन्दर्पः) उ. शारिका

8. किसलयतल्पं हुताशनकल्पं मनुते । कस्मात् ?

( विरहात्, भयात्, क्रोधात्) उ. विरहात्

9. राधा कथं हरिरिति हरिरिति जपति ?

( सकामं, सदाहं, अलोलम्) उ. सकामं,

10. शार्दूलविक्रीडितं विरचयन् यमायते । कः ?

( कामदेवः, कृष्णः, व्याघ्रः) उ. कामदेवः

## उदाहरणानुसारं विश्लेषयत ।

तापोऽपि = तापः + अपि ।

कन्दर्पोऽपि ---------- + ----------- ।

कापि = का + अपि ।

सापि --------- + ----------- ।

नयननलिनमिव = नयननलिनम् + इव ।

बालशशिनमिव - - - - - - - - - - + - - - - - - - - ।

## यथोचितं योजयत ।

| क | | ख |
|---|---|---|
| आवासः | - | विषम् |
| राधा | - | यमः |
| मलयजपङ्कम् | - | विपिनम् |
| कन्दर्पः | - | जाला |
| प्रियसखीमाला | - | हरिणी । |

| | | |
|---|---|---|
| आवासः | - | विपिनम् |
| राधा | - | हरिणी । |
| मलयजपङ्कम् | - | विषम् |
| कन्दर्पः | - | यमः |
| प्रियसखीमाला | - | जाला |

## श्लोकं पठित्वा प्रस्तुतानां अप्रस्तुतानि लिखत ।

आवासो विपिनायते प्रियसखीमालापि जालायते ।
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते ।
सापि त्वद्विरहेण हन्त हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयञ्छार्दूलविक्रीडितम् ।।

| प्रस्तुतानि | अप्रस्तुतानि |
|---|---|
| आवासः | |
| प्रियसखीमाला | |
| तापः | |

| | |
|---|---|
| राधा | |
| कन्दर्पः | |
| मलयजपङ्कम् | |
| श्वसितपवनम् | |
| किसलयतल्पम् | |

**प्रदत्तं गीतं पठित्वा आस्वादनटीकां लिखत।**

दिशि दिशि किरति सजलकणजालम्।
नयननलिनमिव विगलितनालम्।।
( सूचनाः- जयदेवः, गीतगोविन्दम्, विरहातुरा राधिकायाः अवस्था, केशवदर्शनकांक्षया सर्वासु दिक्षु प्रसरति)

**इष्टतमं गीतं चित्वा आस्वादनटीकां लिखत।**

१. नयनविषयमपि किसलयतल्पम्
कलयति विहितहुताशनकल्पम्।।
२. हरिरिति हरिरिति जपति सकामम्।
विरहविहितमरणेव निकामम्।।
३. सरसमसृणमपि मलयजपङ्कम्।
पश्यति विषमिव वपुषि सशङ्कम्।।

**' क' विभागात् प्रदत्तस्य आशयस्य अनुयोज्यं गीतं ' ख' विभागात् चित्वा लिखत।**

| **क** | **ख** |
|---|---|
| राधा हरिरिति सकामं जपति। | सरसमसृणमपि मलयजपङ्कम्। |

| | |
|---|---|
| | पश्यति विषमिव वपुषि सशङ्कम् ।। |
| श्वसितपवनं मदनदहनमिव वहति । | हरिरिति हरिरिति जपति सकामम् ।<br>विरहविहितमरणेव निकामम् ।। |
| मलयजपङ्कं विषमिव पश्यति. | श्वसितपवनमनुपमपरिणाहम् ।<br>मदनदहनमिव वहति सदाहम् ।। |

| क | ख |
|---|---|
| विरहेण अन्तस्तापो वर्धते ।अतः राधा अतिदीर्धं निश्वसति ।<br>सः निश्वासः कामाग्निरिव प्रतीयते । | दिशि दिशि किरति सजलकणजालम् ।<br>नयननलिनमिव विगलितनालम् ।। |
| राधा अश्रुपूर्णं परिक्लान्तं च नयनं कृष्णदर्शनकांक्षया सर्वासु दिक्षु प्रसरति । | नयनविषयमपि किसलयतल्पम्<br>कलयति विहितहुताशनकल्पम् ।। |
| राधा पल्लवैः रचितम् अपि तल्पम् अग्निविरचितं तल्पं इव गणयति । | श्वसितपवनमनुपमपरिणाहम् ।<br>मदनदहनमिव वहति सदाहम् ।। |

## ' तव विरहे ' इति अष्टपद्याः आस्वादनटीकां सूचनानुसारं लिखत ।

अथवा

## सूचनानुसारं विरहिण्याः राधायाः अवस्थामधिकृत्य टिप्पणीं लिखत ।

सूचकाः- आवासो विपिनायते,उदारं हारं भारं मनुते,विषमिव पश्यति, विगलितनालं, किसलयतल्पं विहितहुताशनकल्पम्,हरिरिति हरिरिति जपति ।

## श्लोकं पठित्वा आशयं स्ववाक्यैः लिखत ।

क. स्तनविनिहितमपि हारमुदारम् ।
सा मनुते कृशतनुरिव भारम् ।।

ख. दिशि दिशि किरति सजलकणजालम् ।
नयननलिनमिव विगलितनालम् ।।

## श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

सरसमसृणमपि मलयजपङ्कम् ।

पश्यति विषमिव वपुषि सशङ्कम् ।।

प्रश्नाः-

१. मलयजपङ्कं कीदृशम् ?

२. चन्दनमित्यर्थे प्रयुक्तं पदं किम् ?

३. अस्य गीतस्य आशयं स्ववाक्यैः लिखत ।

## गद्यभागं पठित्वा प्रादेशिकभाषया आङ्गलभाषया वा अनुवदत ।

द्वादशसर्गात्मकः ग्रन्थो भवति गीतगोविन्दम् । द्वादशशतकस्य प्रारम्भ एव अस्य रचनाकालः । भावात्मकेऽस्मिन् काव्ये राधाकृष्णयोः परस्परानुरागः वर्ण्यते । केरलेषु सोपानसङ्गीतरूपेण प्रचारमाप्तं भवति गीतगोविन्दम् । गीतिकाव्ये श्लोकः तदनन्तरं पदमिति क्रमः ।

# वृज हरितम् ।

## I. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

१..पञ्चमवेदःइति प्रख्यातः ग्रन्थः कः ?

(रामायणम्,महाभारतम्,कठोपनिषत्)उ.महाभारतम्

२. एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत् ।एषः कः ?

(वृक्षः,व्याधः, सर्पः) उ.वृक्षः

३. हा हतोऽस्मि ।कस्य रोदनमिदम् ?

(पक्षिणः, लुब्धकस्य, वृक्षस्य) उ. लुब्धकस्य

४. पितरौ कृतज्ञतापूर्वकं कम् अनमताम् ?

(वृक्षराजं,सर्पं, व्याधं) उ.वृक्षराजं

५. "शारिके जानामि सर्वं वृत्तान्तम् ।" कस्याः वचनमिदम् ?

(तापस्याः, मातुः, शारिकायाः) उ.तापस्याः

६. "एकस्यां शाखायां वृक्षः तां दोलयितुं प्रचक्रमे "काम् ?

(तापसीं,शारिकां,मातरं) उ.शारिकां

७. शुककथा कस्मिन् ग्रन्थे उपलभ्यते ?

(महाभारते, रामायणे, रघुवंशे) उ.महाभारते

## II. प्रदत्तं गद्यभागं पठित्वा अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि लिखत ।

**क.**

मातुः पक्षान्तः निद्रासुखमनुभूयमानाः वयं यथाकथञ्चित् सुप्तोत्थिताः । पितरौ भोजनमन्विष्य गतौ । तयोः आगमनकालं यावत् वृक्ष एव पितरौ । स अस्मान् पोतकानिव संरक्षति स्म ।

मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता । वृक्षस्य अधः तण्डुलान् प्रसृतान् यदृच्छया अपश्यम् । तण्डुलान् आहर्तुम् उद्युक्तायां 'हा हतोऽस्मि' ! इति रुदितमश्रौषम् । वृक्षस्य एका शुष्कशाखा कस्यचित् जालधारिणः लुब्धकस्य शिरसि अपतत् इव ।

1) गद्यांशे विद्यमानानां क्त्वान्त-ल्यबन्त-तुमुन्नन्तपदानि चित्वा लिखत ।
2) कौ भोजनमन्विष्य गतौ ?
3) वृक्षस्य अधः किम् अपश्यत् ?
4) 'हा हतोऽस्मि' ! इति रुदितमश्रौषम् । कः कस्मात् रोदिति ?
5) उदाहरणानुसारं पदं विश्लेषयत ।

उदा

हरिरत्र = हरिः + अत्र

- बहिरागता = --------- + -------- ।

**ख.**

"भवन्तः गच्छन्तु, नाहमधुना आगच्छामि । अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुम् शक्नुमः? । एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत् । तत्सर्वं विस्मृत्य आपदि एतम् अनादृत्य गन्तुं नाहं समर्था । गच्छन्तु सर्वे गच्छन्तु ।"

सगद्गदं पुनःपुनः विलपन्ती अन्येषां गमनं सास्त्रं पश्यन्ती तमेव गाढमाश्लिष्य "नाहं गच्छामि,नाहं गच्छामि भवन्तं विहाय नाहं कुत्रापि गच्छामि" ।

I. "भवन्तः गच्छन्तु, नाहमधुना आगच्छामि । कस्याः वचनमिदम् ?
II. अन्येषां गमनं कथं पश्यन्ती ?
III. गद्यभागे विद्यमानानां क्त्वान्त-ल्यबन्त-तुमुन्नन्त अव्ययानि चित्वा लिखत ।
IV. गद्यभागस्य आशयं स्ववाक्यैः संगृह्य लिखत ।
V. रेखाङ्कितपदं विश्लेषयत ।

**ग.**

सा वात्सल्यपूर्णेन चक्षुष तां विलोक्य स्मितमुखी अभूत् । तदा शीतलानिलः विचचाल । मेघः अमृतम् अवर्षयत् । न चिरेणैव वृक्षः पल्लवितः, पत्रैः शाखाभिः च सम्पुष्टः यथापूर्वं परिणतिं प्राप्तवान् । तत्र एकस्यां शाखायां वृक्षः तां दोलायितुं प्रचक्रमे ।
'विलसतु हरिताभां लोकभूत्यै नितान्तम् ।।'

i. सा कीदृशेन चक्षुषा तां विलोक्य स्मितमुखी अभूत् ?
ii. वृक्षः तां किं कर्तुं प्रचक्रमे ?
iii. रेखाङ्कितपदस्य विश्लेषणं कुरुत ।
iv. तदा कः विचचाल ?

## III. कथास्तम्भं क्रमीकुरुत ।

**क.**

* वृक्षः सम्पुष्टः अभवत् ।
* एका शारिका वृक्षं त्यक्त्वा गन्तुम् अशक्ता ।
* व्याधस्य शरेण वृक्षः विद्धः विषबाधितःच ।
* शुष्कं वृक्षं त्यक्त्वा सर्वे गतवन्तः ।
* शारिकायाः आर्द्रतायां सन्तुष्टा तापसी वृक्षं शारिकां च अनुगृह्णाति ।

**ख.**

* तापसी वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभवत् ।

- विषलिप्तः वृक्षः क्रमेण शुष्कः अभवत् ।
- शारिका पुरतः तापसीम् अपश्यत् ।
- वृक्षं अनादृत्य गन्तुं सा न समर्था ।
- वृक्षः पल्लवितः पत्रैः शाखाभिः संपुष्टः अभवत् ।
- विगलितलक्ष्यस्य व्याधस्य शरेण वृक्षः विद्धः ।

## IV. प्रदत्तं गद्यभागं पठित्वा रेखाङ्कितपदानाम् समानपदानि पेटिकातः चित्वा लिखत ।

तदा शीतलः अनिलः विचचाल । मेघः अमृतम् अवर्षत । नचिरेणैव वृक्षः पल्लवितः, पत्रैः शाखाभिः च सम्पुष्टःयथापूर्वं परिणितिं प्राप्तवान् । तत्र एकस्यां शाखायां वृक्षः तां दोलयितुं प्रचक्रमे । विलसतु हरिताभां लोकभूत्यै नितान्तम् ।।

| |
|---|
| आघोषः, पादपः, परिणामः, पर्णैः, वातः |

उत्तरम्

तदा शीतलः वातः विचचाल । मेघः अमृतम् अवर्षत । नचिरेणैव पादपः पल्लवितः, पर्णैः शाखाभिः च सम्पुष्टःयथापूर्वं परिणामः प्राप्तवान् । तत्र एकस्यां शाखायां वृक्षः तां दोलयितुं प्रचक्रमे । विलसतु हरिताभां लोकभूत्यै नितान्तम् ।।

## V. पितरौ कृतज्ञतापूर्वकं वृक्षराजम् अनमताम् । एतत् सन्दर्भं मनसि निधाय सम्भाषणं पूरयतु ।

माता - पुत्रि !शारिके!

शारिका - --------------- ।

माता - कुतः त्वं भीता इव दृश्यते ?

शारिका - ----------------- ।

माता - लुब्धक इति !कः सर्वान् अरक्षत् ?

शारिका - -------------------- ।

माता - वृक्षराजं सधन्यवादं प्रणमामः ।

HSSLiVE.IN

## VI. रेखाङ्कितपदानां स्थाने कोष्ठकात् समानार्थकपदान्युपयुज्य वाक्यं पुनर्लिखत।

प्रातः निर्झर्याः कलरवं श्रुत्वा शाखामृगाणां लाङ्गूलान्दोलनं च दृष्ट्वा शाखायां मन्दं मन्दं आन्दोलयन्ती अहं व्याधस्य लक्ष्यमभवम्।

(निषादस्य,वानराणां,निशम्य)

## VII. गद्यभागं पठित्वा क्त्वान्त- ल्यबन्त- तुमुन्नन्तपदानि चित्वा लिखत

भवन्तः गच्छन्तु, नाहमधुना आगच्छामि। अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुम् शक्नुमः।

क्त्वान्तम् -

ल्यबन्तम् -

तुमुन्नन्तम् -

## VIII.कोष्ठकात् समुचितपदानि स्वीकृत्य गद्यभागस्थ रिक्तस्थानानि पूरयत।

(व्याधस्य, निर्झर्याः, आन्दोलयन्ती, दृष्ट्वा)

प्रातः ------ कलरवं श्रुत्वा शाखामृगाणां लाङ्गूलान्दोलनं च ------- शाखायां मन्दं मन्दं ---------- अहं --------- लक्ष्यमभवत्।

## IX. भाषान्तरीकरणं कुरुत।

१. व्यासप्रणीतः इतिहासग्रन्थः भवति महाभारतम्। महत्तरोऽयं ग्रन्थः पञ्चमवेदत्वेन परिगण्यते। महत्वात् भारवत्वाच्च महाभारतमुच्यते। कुरूणां पाण्डवानां च चरितं मुख्यतया तत्र प्रतिपाद्यः। अपि च बहूनि उपाख्यानानि तत्र तत्र निबद्धानि।

२. पितरौ भोजनमन्विष्य गतौ। तयोः आगमनकालं यावत् वृक्ष एव पितरौ। स अस्मान् पोतकानिव संरक्षति स्म। मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता। वृक्षस्य अधः तण्डुलान् प्रसृतान् अपश्यत्।

## X. गद्यभागं पठित्वा प्रश्नानानाम् उत्तराणि लिखत।

व्यासप्रणीतः इतिहासग्रन्थः भवति महाभारतम्। महत्तरोऽयं ग्रन्थः पञ्चमवेदत्वेन परिगण्यते। महत्वात् भारवत्वाच्च महाभारतमुच्यते। कुरूणां पाण्डवानां च चरितं मुख्यतया तत्र प्रतिपाद्यः। अपि च बहूनि उपाख्यानानि तत्र तत्र निबद्धानि। "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्" इति व्यासस्य वचनं प्रसिद्धम्।

१. व्यासप्रणीतः इतिहासग्रन्थः कः?

२. पञ्चमवेदत्वेन किं परिगण्यते ?

३. महाभारतं कथमुच्यते ?

४. महाभारते कति पर्वाणि सन्ति ?

५. महाभारतस्य मुख्यप्रतिपाद्यविषयः कः ?

६. व्यासस्य प्रसिद्धं वचनं किम् ?

## भविष्ये तव ।

## I. मञ्जूषातः उचितपदानि स्वीकृत्य उत्तरयत ।

1. विश्वचलच्चित्र इतिहासे प्रथमं चलच्चित्रं भवति ।

(भगवद्गीता, आदिशङ्कराचार्यः, प्रियमानसम्) उ. आदिशङ्कराचार्यः

2. सालारं नाम किम् ?

(आतुरालयम्, वृद्धसदनम्, विद्यालयम्) उ. वृद्धसदनम्

3. पुत्रः स्नुषा च ----------------- सोपानमार्गेण बहिरागच्छति ।

(मन्दिरात्, कार्यालयात्, यानात्) उ. कार्यालयात्

4. कार्यालयस्य देहल्यां स्थाणुमवलमवलम्ब्य उपविशति अपरा ------------- ।

(रोसी, वृद्धमाता, स्नुषा) उ. वृद्धमाता

5. सोपानस्य वामतः एका पुरातनी ------------- ।

(सरणी, द्रोणी, पीठिका) उ. द्रोणी

6. तात प्रकोष्टे तस्मिन् --------------- वर्तते ।

(उष्णं, शैत्यं, धूमं) उ. उष्णं

7. खिन्नः इति पदस्य समानार्थः कः?

(सन्तुष्टः, दुःखितः, पलायितः) उ. दुःखितः

8. तत्र व्यजनमेकं स्थाप्यताम् - कस्याः इदं वचनम् ?

(रोस्याः, वृद्धमातुः, पत्न्याः) उ. रोस्याः

9. दिनाभ्यन्तरे मृतिस्तासाम् - कस्याः इदं वचनम् ?

( रोस्याः, मातुः,पत्न्याः) उ. पत्न्याः

II. उदाहरणानुसारं विश्लेषयत।

उदाः- ततस्तस्य = ततः + तस्य।

मृतिस्तासाम् = - - - - - + - - - - - - - ।

नेष्यमाणस्त्वम् = - - - - - - + - - - - - - ।

III. क्त्वान्त- ल्यबन्त- तुमुन्नन्तपदानि चित्वा लिखत।

क.

पुत्रः परिवृत्य अवलोकयति। रोसी आगच्छति। रोसी वदति। लक्ष्म्यै व्यजनम् अनपेक्षितमेव। ईदृशमुष्णं सोढुं सा समर्था एव। एतस्मादपि असह्यमुष्णं सोढ्वा एव सा भवन्तमपोषयत्।

क्त्वान्तम् -

ल्यबन्तम् -

तुमुन्नन्तम् -

उत्तरम्

क्त्वान्तम् - सोढ्वा

ल्यबन्तम् - परिवृत्य

तुमुन्नन्तम् - सोढुं

ख

पुत्रः सालारात् बहिः आगत्य चिन्तामग्नो बभूव। ईदृशमुष्णं सोढुं सा समर्था इति वाक्यं श्रुत्वा सः स्तब्धः।

क्त्वान्तम् -

ल्यबन्तम् -

तुमुन्नन्तम् -

उत्तरम्

क्त्वान्तम् - श्रुत्वा

ल्यबन्तम् - आगत्य

तुमुन्नन्तम् - सोढुं

IV, पेटिकातः पदान्युपयुज्य वाक्यानि पूरयत।

| | | |
|---|---|---|
| चिन्ताकुले नेत्रे | उपनेत्रं | गृह्णाति |
| खिन्नः पुत्रः | दक्षिणहस्तं | अपसार्यते |
| बालकः पितुः | दर्पणे | दृश्यते। |

उत्तरम्

चिन्ताकुले नेत्रे दर्पणं दृश्यते।

खिन्नः पुत्रःउपनेत्रं अपसार्यते।

बालकः पितुः दक्षिणहस्तं गृह्णाति।

VII. संस्कृतभाषया अनुवदत।

വൃദ്ധജനപരിപാലനം നമ്മുടെ കർത്തവ്യമാണ്.
ഗുരുജനങ്ങൾ ദേവതാസമാനരാണ്.
നമ്മുടെ ജീവിതം മാതൃകാപരമാവണം.

VIII. यथोचितं योजयत।

वृद्धसदनम् - वाहनम्

यानम् - सालारम्

द्रोणी - अन्तेवासिनी

रोसी - पात्रम्।

उत्तरम्

वृद्धसदनम् - सालारम्

यानम् - वाहनम्

द्रोणी - पात्रम्

रोसी - अन्तेवासिनी ।

IX. कोष्ठकात् उचितपदानि स्वीकृत्य रिक्तस्थानानि पूरयत ।

पुत्रः कार्याने -------------- ।चिन्ताकुले नेत्रे ----------- दृश्यते । खिन्नः पुत्रः उपनेत्रम् अपसार्य करवस्त्रेण मुखं ----------------- ।

( मार्जयति, उपविशति, अपसार्य, दर्पणे)

उत्तरम्

पुत्रः कार्याने उपविशति । चिन्ताकुले नेत्रे दर्पणं दृश्यते । खिन्नः पुत्रः उपनेत्रम् अपसार्य करवस्त्रेण मुखं मार्जयति ।।

X. खण्डिकां पठित्वा प्रदत्तेषु प्रश्नवाचकशब्देषु त्रीणि उपयुज्य प्रश्नवाक्यानि लिखत ।

रोसी मुखात् उपनेत्रम् अपसार्य पुनः स्थापयति । पुत्रः कार्याने उपविशति । चिन्ताकुले नेत्रे दर्पणं दृश्यते । रोस्याः शब्दं प्रतिध्वनति । खिन्नः पुत्रः उपनेत्रम् अपसार्य करवस्त्रेण मुखं मार्जयति ।

( कुत्र, कः, केन, का)

XI. गद्यभागं पठित्वा पटकथारूपेण परिवर्त्य लिखत ।

क.

" तिष्ठत तत्रैव तिष्ठत । भवदीयं सर्वं प्रयच्छत । नो चेत् प्राणान् हरिष्याम्यहम् । " काननमध्यात् कर्णकठोरं गर्जनं श्रुत्वा सप्तर्षयः चकिताः अभवन् । झटिति तीक्ष्णं रक्तपङ्किलं खड्गं प्रसार्य भयङ्करः कश्चन निषादः तेषां पुरतः आपतत् । " सर्वमपि प्रयच्छत " सः उच्चैराक्रोशत् ।

ख

" भवन्तः गच्छन्तु , नाहमधुना आगच्छामि । अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुम् शक्नुमः ? एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत् । तत्सर्वं विस्मृत्य आपदि एतम् अनादृत्य गन्तुं नाहं समर्था । गच्छन्तु, सर्वे गच्छन्तु ।"

ग.

कतिपयदिनानन्तरं पाणिनिः मात्रा दास्या साकं जलमाहर्तुं नदीमगच्छत् । दैनिकक्रम इव माता कुम्भे जलं पूरयित्वा तटगते शिलातले न्यस्यति स्म । सा पुत्रमेवम् अवदत्- "पुत्र, निरन्तरं घटविन्यासेन तदधोभागस्य चिह्नं शिलोपरि न पश्यसि किम् ? एवं शिलायामपि परिणामो भवति,किं नु खलु त्वयि न ? कष्टेयं दशा ।"

HSSLiVE.IN

पटकथा (मातृका)

## १. प्रदत्तं गद्यभागं पटकथारूपेण लिखत ।

" तिष्ठत तत्रैव तिष्ठत । भवदीयं सर्वं प्रयच्छत । नो चेत् प्राणान् हरिष्याम्यहं । " काननमध्यात् कर्णकठोरं गर्जनं श्रुत्वा सप्तर्षयः चकिताः अभवन् । झटिति तीक्ष्णं रक्तपङ्किलं खड्गं प्रसार्य भयङ्करः कश्चन निषादः तेषां पुरतः आपतत् । " सर्वमपि प्रयच्छत " सः उच्चैराक्रोशत् ।

दृश्यम् - १

कथापात्राणि - रत्नाकरः , सप्तर्षयः

प्रदेशः - घोरं वनम् ।

| रङ्गविवरणम् | सम्भाषणम् | विनिमयः |
|---|---|---|
| निबिडम् वनम् । तत्र अनेकाः वन्यजीविनःसन्ति । सिंह , व्याघ्र, वनगज इत्यादयः वन्यमृगाः तत्र तत्र निर्भयेन अटन्ति । तत्र एका नदी अस्ति । वने स्वच्छन्दं विहरन्तः सप्तर्षयः नद्यां जलं पातुं उद्युक्ताः. . . | " तिष्ठ तत्रैव तिष्ठ भवदीयं सर्वं प्रयच्छत । नो चेत् प्राणान् | छायाग्राही वनं विपुलीकरोति |

| | | |
|---|---|---|
| सप्तर्षयः कर्णकठोरं गर्जनं श्रुत्वा चकिताः । भयङ्कररूपः कश्चन निषादःखड्गं प्रसार्य तेषां पुरतः आपतत् । सः उच्चैराक्रेशत्<br><br>सप्तर्षिषु अन्यतमःमहान् योगी वसिष्ठःतम् अपृच्छत् ।<br><br>निषादः उच्चैराक्रोशत् । | हरिष्याम्यहम् ।"<br><br>" सर्वमपि प्रयच्छत" ।<br><br>" केवलं कमण्डलुः वल्कलश्च अस्माकं धनम् ,तेन तव किं प्रयोजनम् ।"<br>कमण्डलुश्चेत् कमण्डलुः दातव्यं तत् ।" | छायाग्राही निषादस्य समीपे<br><br>छायाग्राही तेषां समीपे |
| | | |
| वसिष्ठः स्नेहेन समन्दहासम् उवाच ।<br><br>वसिष्ठस्य " वत्स " इति सम्बोधनेन तस्य मनसि कामप्यनुभूतिम् अजायत । सः प्रत्यवदत् ।<br><br>वसिष्ठः उवाच । | " वत्स कस्त्वं , तेन तव किं प्रयोजनम् ?"<br><br>" अहं रत्नाकरो नाम निषादः । पथिकानां धनप्राणापहरणं कृत्वा कुटुम्बं पालयामि ।<br><br>" धनप्राणापहरणं किं न पापाय ? अस्य पापस्य फलं तव भार्यापुत्रादयः फलभाजः किम् ?" | छायाग्राही समीपे |

| | | |
|---|---|---|
| वसिष्ठस्य अप्रतीक्षितप्रश्नेन , निर्गतकोपः रत्नाकरः किञ्चित् समयम् अचिन्तयत् । सः अवदत् ।<br><br>वसिष्ठः अवदत् । | " अहं न जाने । पृष्ट्वा आगच्छामि । "<br><br>तथास्तु । | |

## २. प्रदत्तं गद्यभागमाधारीकृत्य पटकथां लिखत ।

" भवन्तः गच्छन्तु , नाहमधुना आगच्छामि । अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुं शक्नुमः ? एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत् । तत्सर्वं विस्मृत्य आपदि एतम् अनादृत्य गन्तुं नाहं समर्था । गच्छन्तु, सर्वे गच्छन्तु ।"

दृश्यम् - १

कथापात्राणि - शारिका , शुष्कः वृक्षः , शारिकायाः पितरौ , अन्यः पक्षिणश्च ।

प्रदेशः - वनम् ।

| रङ्गविवरणम् | सम्भाषणम् | विनिमयः |
|---|---|---|
| काननमध्ये एकः शुष्कः वृक्षः । तस्मात् वृक्षात् शुष्काः पर्णाः निपतन्ति । तत्र वृक्षस्य एकस्यां शुष्कशाखायां शारिका उपविशति । तस्याः पितरौ<br>अन्याः पक्षिणश्च तं शुष्कं वृक्षं त्यक्त्वा अन्यत्र गमनाय सन्नद्धाः । ते शारिकाम् | " अये शारिके शीघ्रम् आगच्छतु । | छायाग्राही समीपे |

| | | |
|---|---|---|
| आह्वयति ।<br><br><br>शारिका दुःखेन तान् विलेक्य सगद्गदं अवदत् | एषः वृक्षः शुष्कः ।अयं न वासयोग्यः । तस्मात् अन्यत्र गच्छामः ।"<br>"भवन्तः गच्छन्तु । नाहमधुना आगच्छामि ।अस्यां दयनीयाम् अवस्थां विचिन्त्य नाहं कुत्रापि गच्छामि ।" | |

| | | |
|---|---|---|
| | | |

| | | |
|---|---|---|
| शारिकायाः मुखं अश्रुपूर्णं भवति । सा तं वृक्षं गाढमाश्लिष्य , अन्येषां गमनं सास्त्रं पश्यन्ती ,एवम् अचिन्तयत् । | " एषः वृक्षः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत् । तत्सर्वं विस्मृत्य कथमेतं त्यक्त्वा गन्तुम् शक्नुमः ।" | छायाग्राही शारिकां विपुलीकरोति । |
| शारिकायाः दुःखं दृष्ट्वा वृक्षः अवदत् । | " शारिके गच्छतु, कतिपयदिनानन्तरम् अहं पतिष्यामि ।अन्यत्र कुत्रापि गत्वा नीडं रचयतु, सुखेन वसतु ।" | छायाग्राही वृक्षस्य समीपे । |
| शारिका पुनः अपि तं गाढमाश्लिष्य | " नाहं गच्छामि, नाहं गच्छामि । भवन्तं विहाय नाहं कुत्रापि गच्छामि ।" | |
| तदा शीतलानिलः विचचाल । मेघः अमृतम् अवर्षत् । वृक्षः पल्लवितः यथापूर्वं अभवत् ।। | | |

**नेपथ्ये पश्चात्तलगीतं श्रूयते ।**

## "विलसतु हरिताभा लोकभूत्यै नितान्तम् ।"

## चिन्तारतो बालकः

## I. कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

१. क्रिस्तुभागवतस्य कर्ता कः ?

(पि.सि. कुट्टिकृष्णन्, पि.सि. देवस्या,अर्णोस् पातिरी) उ. पि.सि. देवस्या

२. कस्मिन् नगरे शिल्पी कन्यया साकं शिशुम् अपूपुषत् ?

(नसरत्, ताबोर्, एतन्स्) उ. नसरत्

३. तक्षकेण अनुष्ठितं व्रतं किम् ?

(उपवासः,असिधारा, अहिंसा) उ. असिधारा

४. बालकः पित्रा साकं कथम् अवर्धत ?

(अद्भुतानन्दशान्तिभिः, मास्मरिकवृत्या, स्वाभाविकतया) उ. अद्भुतानन्दशान्तिभिः

५. सः बालकः -------- बालकैः सह क्रीडातत्परः आसीत् ।

(आरबीय, यहूद,पार्सी) उ. यहूद

६. कं निरीक्ष्य भविकाले एवं शिष्याः भवेयुः इति सः चिन्तयामास ?

(अजवृन्दं,गोपवृन्दं,यहूदवृन्दं) उ. अजवृन्दं

७. तेन मुनिना कस्य अधित्यकां नीतः ?

(ताबोरद्रेः, नासरथेः, महेन्द्रस्य) उ. ताबोरद्रेः

८. ताबोरद्रेः अधित्यकाम् रम्याः प्रकृतिसम्पदः पश्यन् स्थण्डिले किमकरोत् ?

(अक्रीडत्, अशेत, अतिष्ठत) उ. अशेत

९. 'निजं भाविशिष्यगणं चिन्तयामास ' - कः ?

(जोसफ्, येशुः, मेषपालः) उ. येशुः

१०. 'मुनिः तद्वृत्तं प्रियामाचष्ट' – मुनिः कः ?

(जोसफ्, येशुदेवः, मरिया) उ. जोसफ्

## II. गद्यभागस्य आशयप्रतिपादकं श्लोकं चित्वा लिखत ।

गद्यभागः- मातापित्रोः अद्भुतानन्देन शान्त्या च साकं वृद्धिमुपगतः ।

(क) आत्मना बलवानेष ज्ञानपूर्णश्च बालकः ।
अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः ।।

(ख) यहूदबालकैरन्यैः क्वापि क्रीडारतस्तथा ।
क्वापि चिन्तापरः सर्वैरलक्ष्यत स बालकः ।।

## III. क विभागे प्रदत्तस्य आशयस्य समानार्थकं श्लोकं ख विभागात् चित्वा लिखत।

| क | ख |
|---|---|
| प्रकृतिदृश्यम् आस्वाद्य सः स्थण्डिले अशेत। | मेषपालैर्नीयमानं मेषयूथं निरीक्ष्य सः।<br>कुमारश्चिन्तयामास भाविशिष्यगणं निजम्॥ |
| अजगणं दृष्ट्वा भाविशिष्यगणं चिन्तयामास। | यहूदसमुदाचारवर्त्मना तं कुमारकम्।<br>नेतुं वैदिकलेखान्स तक्षकस्तमशिक्षयत्॥ |
| सः तक्षकः वैदिकलेखान् अशिक्षयत्। | मुनिना तेन नीतोऽसौ ताबोरद्रेरधित्यकाम्।<br>अशेत स्थण्डिले पश्यन् रम्याः प्रकृतिसम्पदः॥ |
| जोसफ् मरियया सार्कं दिव्यं शिशुम् अपूपुषत्। | यहूदबालकैरन्यैः क्वापि क्रीडारतस्तथा।<br>क्वापि चिन्तापरः सर्वैरलक्ष्यत सबालकः॥ |
| स बालकः सदा चिन्तापरः इव अवर्धत। | पुरे नासरथे सार्धं कन्यया प्रियया चरन्।<br>असिधाराव्रतं तक्षा शिशुं दिव्यमपूपुषत्॥ |

## IV. उदाहरणानुसारं वाक्यद्वयं योजयत।

उदा - विद्यालयं गच्छति। पाठं पठति।

विद्यालयं गत्वा पाठं पठति।

१. पुस्तकं पश्यति। पाठं वाचयति।

२. घण्डानादं श्रुणोति। कक्ष्याम् आगच्छति।

३.स्नानं करोति । ईश्वरं वन्दते।

४. आसन्दे उपविशति।ओदनं भक्षयति।

उत्तरम्

पुस्तकं दृष्ट्वा पाठं वाचयति।

घण्डानादं श्रुत्वा कक्ष्याम् आगच्छति।

स्नानं कृत्वा ईश्वरं वन्दते।

आसन्दे उपविश्य ओदनं भक्षयति।

HSSLiVE.IN

## V. उदाहरणानुसारं विश्लेषयत ।

उदा - यहूदबालकैरन्यैः = यहूदबालकैः + अन्यैः

१. छात्रैरन्यैः = --------- + --------- ।

२. मित्रैरन्यैः = ---------- + --------- ।

## VI. श्लोकं दृष्ट्वा गद्यक्रमं पूरयत ।

क.

यहूदबालकैरन्यैः क्वापि क्रीडारतस्तथा ।

क्वापि चिन्तापरः सर्वैरलक्ष्यत सबालकः ।।

सः ------ क्वापि अन्यैः ------- क्रीडारतः तथा क्वापि ----- च -------अलक्ष्यत ।

ख.

मेषपालैर्नीयमानं मेषयूथं निरीक्ष्य सः ।

कुमारश्चिन्तयामास भाविशिष्यगणं निजम् ।।

मेषपालैः ------- मेषयूथं ----- स -------निजं -------- चिन्तयामास ।

ग.

आत्मना बलवानेष ज्ञानपूर्णश्च बालकः ।

अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः ।।

आत्मना एष ------- बलवान् --------- च पित्रोः ------------समं --------- ।

## VII. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।

a. मेषपालैर्नीयमानं मेषयूथं निरीक्ष्य सः ।

कुमारश्चिन्तयामास भाविशिष्यगणं निजम् ।।

1) सः कुमारः चिन्तयामास । अत्र कुमारः कः ?

2) सः कुमारः किं चिन्तयामास ?

3) श्लोके प्रदत्तं ल्यबन्तम् अव्ययं चित्वा लिखत ।

4) श्लोकस्य आशयं स्ववाक्यैः लिखत ।

b. पुरे नासरथे सार्धं कन्यया प्रियया चरन् ।

असिधाराव्रतं तक्षा शिशुं दिव्यमपूपुषत् ।।

(1)तक्षकेण आचरितं व्रतं किम् ?

(2)दिव्यं शिशुम् अपूपुषत् । शिशुः कः?

(3)रेखाङ्कितस्य पदच्छेदं लिखत ।

(4)शलोकस्य गद्यक्रमं लिखत ।

c. मुनिना तेन नीतोऽसौ ताबोरद्रेरधित्यकाम् ।
अशेत स्थण्डिले पश्यन् रम्याः प्रकृतिसम्पदः ।।

a) मुनिना कस्य अधित्यकां नीतः ?

b) प्रकृतिसम्पदः पश्यन् स्थण्डिले किमकरोत् ?

c) रेखाङ्कितस्य पदच्छेदं लिखत ।

d) श्लोकस्य आशयं स्ववाक्यैः लिखत ।

## VIII. रेखाङ्कितपदानां स्थाने समानार्थकपदान्युपयुज्य वाक्यं पुनर्लिखत ।

तेन मुनिना ताबोरद्रेः अधित्यकां नीतः । असौ रम्याः प्रकृतिसम्पदः पश्यन् स्थण्डिले अशेत ।

(अवलोकयन्, प्रापितः, शयितवान्, मनोहराः)

उत्तरम्

तेन मुनिना ताबोरद्रेः अधित्यकां प्रापितः । असौ मनोहराः प्रकृतिसम्पदःअवलोकयन्, स्थण्डिले शयितवान् ।

## IX. पेटिकायाः पदान्युपयुज्य द्वौ वाक्यौ लिखत ।

| | | | |
|---|---|---|---|
| नीतः | ताबोरद्रेः | तेन मुनिना | अधित्यकां |
| भाविशिष्यगणं | निजं | स कुमारः | चिन्तयामास |

उत्तरम्

१.तेन मुनिना ताबोरद्रेः अधित्यकां नीतः ।

२.स कुमारः निजं भाविशिष्यगणं चिन्तयामास ।

HSSLiVE.IN

## X.यथोचितं योजयत ।

| | |
|---|---|
| मुनिः | पि. सि.देवस्या |
| क्रिस्तुभागवतम् | व्रतम् |
| असिधारा | येशुदेवः |
| चिन्तारतः बालकः | जोसफ् |

उत्तरम्

मुनिः - जोसफ्

क्रिस्तुभागवतम् - पि.सि.देवस्या

असिधारा - व्रतम्

चिन्तारतः बालकः - येशुदेवः

## को हेतुः ?

### i. अधः प्रदत्तानां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत ।

१. आत्मनाथवियोगात् व्रणितात्मा का ?

(यशोदा,यशोधरा, देवकी)उ. यशोधरा

२. सिद्धार्थःकेन सह जनपदमगच्छत् ?

( छन्देन, कृष्णेन ,बालेन) उ. छन्देन

३. सुप्रबुद्धस्य पुत्री का ?

(राधा , मायादेवी , यशोधरा) उ. यशोधरा)

४. सिद्धार्थः कस्य हेतुं परिचिन्तयति ?

(जननमरणानां, सुखस्य , विरहस्य ) उ.जननमरणानां

५. सिद्धार्थः कुत्र तूष्णीमुपाविशत् ?

(मण्डपे , सिंहासने , बिल्ववेदिकायाम्) उ. बिल्ववेदिकायाम्)

६ . ' गात्रम् ' इति पदस्य समानार्थकपदं लिखत ।

(शरीरम् ,मनः ,वायुः) उ. शरीरम्

७. चापश्यम् - पदच्छेदं किम् ? उ. च + अपश्यम्

८. केवलं जिवितुं कियान् ----- अनुभूयते ।

(क्लेशः, रोगः , सुखः) उ. क्लेशः

९. दुःखस्य मूलं -----भवति ।

(सुखम्, आशा , क्लेशम्) उ. आशा

१०. गौतमबुद्धस्य मार्गः -----भवति ।

(जैनधर्मः, हिन्दुधर्मः,बौद्धधर्मः) उ. बौद्धधर्मः

११. शुद्धोदनस्य मायादेव्याःच सुपुत्रः आसीत् ।

(छन्दः, सिद्धार्थः, कृष्णः) उ. सिद्धार्थः

## ii. कोष्ठकात् अव्ययपदानि उपयुज्य वाक्यानि पूरयत ।

( तथापि, एवम्, नैव, एव, किन्तु )

कूपात् जलं कर्षयन्तः ---- अतिकठिनानि कर्माणि कुर्वन्तः । -----अत्यावश्यकम् अनार्जयन्तः ---- भूरिणः । सुवर्णताल्यां मोदकानि ----- आवश्यकानि । ---- शुष्के पत्रे क्षुधां शमयितुं यत्किञ्चिदावश्यकं खलु ।

उत्तरम्

कूपात् जलं कर्षयन्तः एवम् अतिकठिनानि कर्माणि कुर्वन्तः । तथापि अत्यावश्यकम् अनार्जयन्तः एव भूरिणः । सुवर्णताल्यां मोदकानि नैव आवश्यकानि । किन्तु शुष्के पत्रे क्षुधां शमयितुं यत्किञ्चितावश्यकं खलु ।

## iii. उत्तरं लिखत ।

अ. जीवितस्य वेदनामहमजानम् इति वाक्यं कः कां प्रति अवदत् ?

आ. वार्धक्यं रोगमरणं च साधारणमेव हि । कस्याः वचनमिदम् ?

## iv. यथोचितं योजयत ।

| | | |
|---|---|---|
| माटम्प् कुञ्ञुकुट्टन् | - | सिद्धार्थस्य पत्नी |
| अशोकन् पुरनाट्टुकरा | - | महाप्रस्थानम् |
| शुद्धोदनः | - | को हेतुः |
| यशोधरा | - | कपिलवस्तुनरेशः । |

उत्तरम्

माटम्प् कुञ्ञुकुट्टन्  -  महाप्रस्थानम्

अशोकन् पुरनाट्टुकरा  -  को हेतुः

शुद्धोदनः  -  कपिलवस्तु नरेशः ।

यशोधरा  -  सिद्धार्थस्य पत्नी

### v. मातृभाषया आङ्गलभाषया वा अनुवदत ।

वार्धक्यं रोगमरणं च साधारणमेव हि । सर्वैरपि दृष्टं च तत् । यद्यपि इतरेषां वेदना न  दृष्टा तथापि स्वकीयां वेदनां जानात्येव हि । यद्यपि जरावन्तमन्यं वृद्धं न पश्यति ।तथापि स्वकीयस्य एवमेव ।

### vi. को हेतुः इति पाठाधारेण सूचनानुसारं बुद्धदेवस्य जीवितमधिकृत्य उपन्यासं लिखत ।

अद्याहं लोकमपोश्यं ,  जीवितस्य वेदनामहमजानम्,  अत्यावश्यकम् अनार्जयन्तः,  दृष्टानां हेतुं परिचिन्तयामि ।

### vii. अधः प्रदत्तं गद्यभागं पठित्वा निर्देशानुसारम् उत्तरयत ।

सायं प्रत्यागतः सिद्धार्थः उद्यानस्य बिल्ववेदिकायां तूष्णीमुपाविशत् । तन्नेत्रे अर्धनिमीलिते आस्ताम् । सः एवं अवदत्  - "यशोधरे अद्याहं लोकमपश्यं । वार्धक्यं मरणं चापश्यम् । रोगं वेदनां चापश्यम् ।" यशोधरा प्रत्यवदत् - "साधारणम् अनया यशोधरया  कियद्वारं दृष्टमस्ति एतत्सर्वम् । बाल्ये सुप्रबुद्धस्य पुत्रीत्वेन  सखीभिः सह विचरत्यवसरे । तेन किम् ? वार्धक्यं रोगमरणं च साधारणमेव  । सर्वैरपि दृष्टं च तत् ।  जीवितस्य वेदनामहमजानम् । केवलं जीवितुं कियान् क्लेशः  अनुभूयते ।"

a. गद्यभागे निःशब्दम् इत्यर्थे प्रयुक्तं पदं किम् ?

b. सिद्धार्थः कुत्र तूष्णीमुपाविशत् ?

c. सुप्रबुद्धस्य पुत्री का ?

d. 'कियद्वारम् '  इत्यस्य पदच्छेदः कः ?

### viii. संभाषणं पूरयत ।

सिद्धार्थः  -  यशोधरे श्रूयताम् ।

यशोधरा  -  आम्  । वदतु ।

सिद्धार्थः  -  --------- ।

यशोधरा  -  अनया यशोधरयापि कियद्वारं दृष्टमस्ति एतत्सर्वम् ।

सिद्धार्थः - -------------------- ।

## ix. अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत ।

(तत्र , सह , तूष्णीम् , अद्य )

A. हे , बालकाः शब्दं मा कुर्वन्तु , ------- उपविशन्तु ।

B. ------- बुधवासरः भवति ।

C. पुत्रः पित्रा ------ आपणं गच्छति ।

D. मम पुस्तकं ------- अस्ति ।

उत्तरम्

A. हे , बालकाः शब्दं मा कुर्वन्तु , तूष्णीम् उपविशन्तु ।

B. अद्य बुधवासरः भवति ।

C. पुत्रः पित्रा सह आपणं गच्छति ।

D. मम पुस्तकं तत्र अस्ति ।

## x. संस्कृतभाषया अनुवदत ।

क.

१. ശുദ്ധോദനന്റെയും മായാദേവിയുടെയും പുത്രനായിരുന്നു സിദ്ധാർത്ഥൻ.

२. ഇന്ന് ഞാൻ ലോകത്തെ കണ്ടു. വാർദ്ധക്യവും മരണവും കണ്ടു.

३.വാർദ്ധക്യവും രോഗമരണവും സാധാരണമാണല്ലോ.

४.ജീവിതത്തിന്റെ വേദന ഞാനറിഞ്ഞു.

५. ഗൗതമബുദ്ധന്റെ മാർഗ്ഗം ബുദ്ധമതം എന്ന പേരിൽ പ്രസിദ്ധി നേടി.

## xi. अधः प्रदत्तानि प्रादेशिकभाषया आङ्गलभाषया वा परिवर्तयत ।

१. अहं विद्यालयं गच्छामि ।

२. अशोकः विपणीं गच्छति ।।

३. सूर्यः उदयति ।

४. चन्द्रः शोभते ।

५. केरलं मनोहरं भवति ।

## xii. अधो रेखङ्कितपदानां स्थाने पेटिकातः समानार्थकपदान्युपयुज्य खण्डिकां पुनर्लिखत ।

कपिलवस्तुनरेशस्य शुद्धोदनस्य पुत्रः आसीत् सिद्धार्थः । एकदा सह छन्देन सह जनपदं द्रष्टुं प्रातिष्ठत । सायं प्रत्यागतः उद्यानस्य बिल्ववेदिकायां तूष्णीमुपाविशत् । जनानां दुरितानि दृष्ट्वा सिद्धार्थः खिन्नमानसः अभवत् । मानवानां दुःखनिवृत्तये सिद्धार्थः पत्नीं पुत्रं च विहाय गृहात् प्राव्रजत् ।

| |
|---|
| भार्यां, उपवनस्य, दुःखितमानसः, राज्यं, तनयः, नृपस्य |

HSSLiVE.IN

RATHI.T
GHSS. VARAVOOR
THRISSUR

TEAM NAVADHARA IN ASSOCIATION WITH NAVADARSAN 2021